# देवीसूक्त

## deviisuukta[1]

॥ अथ देवीसूक्तं॥

ऋग्वेद १०.१२५

अहं रुद्रेभिरित्यादिमन्त्रस्य ब्रह्माद्या ऋषयो गायत्र्यादीनि छन्दांसि,
आद्या देवी देवता, देवीसूक्तजपे विनियोगः ।

ॐ अहं रुद्रेभिर्बसुभिश्चराम्यहमादितैरुत विश्वदेवैः ।
अहं मित्रावरुणोभा विभर्म्यहमिन्द्राग्नी अहमश्विनोभा ॥१॥

अहं सोममाहनसं विभर्म्यहं त्वष्टारमुत पूषणं भगं ।
अहं दधामि द्रविणं हविष्मते सुप्राव्ये यजमानाय सुन्वते ॥२॥

अहं राष्ट्री संगमनी वसूनां चिकितुषी प्रथमा यज्ञियानाम् ।
तां मा देवा व्यदधुः पुरुत्रा भूरिस्थात्रां भूर्यावेशयन्तीं ॥३॥

मया सो अन्नमत्ति यो विपश्यति यः प्राणिति य ईं शृणोत्युक्तं ।
अमन्तवो मां त उप क्षियन्ति श्रुधि श्रुत श्रद्धिवं ते वदामि ॥४॥

अहमेव स्वयमिदं वदामि जुष्टं देवेभिरुत मानुषेभिः ।
यं कामये तं तमुग्रं कृणोमि तं ब्रह्माणं तमृषिं तं सुमेधां ॥५॥

अहं रुद्राय धनुरातनोमि ब्रह्मद्विषे शरवे हन्तवा उ ।
अहं जनाय समदं कृणोम्यहं  द्यावापृथिवी आ विवेश ॥६॥

अहं सुवे पितरमस्य मूर्धन् मम योनिरप्स्वन्तः समुद्रे ।
ततो वितिष्ठे भुवनानु विश्वोतामूं द्यां वर्ष्मनोपस्पृशामि ॥७॥

अहमेव वात इव प्रवाम्यारभमाणा भुवनानि विश्वा ।
परो दिवा पर एना पृथिवैतावती महिमा सं वभूव ॥८॥

॥ इति ऋग्वेदोक्त देवीसूक्तं समाप्तं ॥

---

[1] Send corrections to Dhruba Chakroborty dhruba@nfinity.nfinity.com